पत्र - १

श्रीरामाय नमः ॥ अथ शनिस्तोत्रारंभः ॥ पुरा राज्ये नृश्रेष्ठाय नलाय
प्रददौ किल । स्वप्ने शौरिः स्वयं मंत्रं सर्वकामफलप्रदं ॥ १ ॥ क्रोडं नी
लांजनप्रख्यं नीलजीमूतवाहनं । छायामार्तंडसंभूतं नमस्यामि
शनैश्चरं ॥ २ ॥ नमोऽर्कपुत्राय शनैश्चराय नीहारवर्णांजनमेचकाय ।
श्रुत्वा रहस्यं भवकामदो मे फलप्रदो मे भव सूर्यपुत्र ॥ ३ ॥ नमो
स्तु प्रेतराजाय कृष्णदेहाय वै नमः । शनैश्चराय क्रूराय सिद्धिबुद्धि
प्रदायिने ॥ ४ ॥ य एभिर्नामभिः स्तौति तस्य तुष्टो भवाम्यहं । मामकीनं
भयं तस्य स्वप्नेपि न जायते ॥ ५ ॥ गार्गीयः कौशिकश्चैव पिप्प
लादो महामुनिः । शनैश्चरकृतां पीडां न स्पृशंति त्रयः स्मृताः ॥ ६ ॥ क्रोड
स्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः । सौरिः शनैश्चरो मंदः ।

9" x 4"

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पिप्पलादेनसंस्कृतं: [illegible] तानि शूनिनामानि प्रातरुत्थाययः
पठेत् तस्य शनैश्चरीपीडा न भवंति कदाचन ॥ ध्वजिनी
धामिनी चैव कंकाली कलहप्रि[illegible]या कलही कंटकी चैव
गा तुरंगी च सुलोचना ६ नामानि शूनि भार्य्याया: प्रातरु-
त्थाय यः पठेत् तस्य शनैश्चरी: पीडा न भवंति कदाचन १०॥ इति
शनैश्चरस्तोत्रं संपूर्णम् ॥ शुभं भूयात् मंगलमस्तु ॥

शनिस्तोत्र. पं. १८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri